योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०६९

एकोनसप्ततितमः सर्गः ६९

श्रीराम उवाच ।

कुतः शतत्वमायातं रुद्राणां मुनिनायक ।

ये गणास्ते तु ये रुद्रा उत नेति वदाशु मे ।। १

श्रीवसिष्ठ उवाच ।

स्वप्नानां भिक्षुणा दृष्टं शतं शतशरीरकम् ।

सर्वमुद्देशतो ज्ञातं तत उक्तं न तन्मया ।। २

य आकाराश्च ते स्वप्ने तत्तद्गणशतं स्मृतम् ।

तदेतद्रुद्रशतकं रुद्रा अपि गणा विधौ ।। ३

श्रीराम उवाच ।

एकस्माद्भगवंश्चित्तात्कथं चित्तशतं कृतम् ।

तत्स्वप्नकृतरुद्रेण दीपाद्दीपशतं यथा ।। ४

श्रीवसिष्ठ उवाच ।

निरावरणसद्भावा यद्यथा कल्पयन्ति हि ।

तत्तथानुभवन्त्येव रसावरणसंविदः ।। ५

सर्वात्मनः सर्वगत्वाद्यद्यथा यत्र भाव्यते ।

तथानुभूयते तत्र तत्तथा ज्ञतया धिया ।। ६

श्रीराम उवाच ।

कपालमालाभरणो भस्मशाली दिगम्बरः ।

श्मशाननिलयो ब्रह्मन्कामुकश्च किमीश्वरः ।। ७

श्रीवसिष्ठ उवाच ।

महेश्वराणां सिद्धानां जीवन्मुक्तशरीरिणाम् ।

न क्रियानियमोऽस्तीह स ह्यज्ञस्यैव कल्पितः ।। ८

अज्ञस्तु दितचित्तत्वात्क्रियानियमनं विना ।

गच्छन्न्यायेन मात्स्येन परं दुःखं प्रयाति हि ।। ९

सुज्ञास्त्विष्टेष्वनिष्टेषु न निमज्जन्ति वस्तुषु ।

यतेन्द्रियत्वाद्बुद्धत्वान्निर्वासनतया तथा ।। १०

काकतालीयवद्रूढां क्रियां कुर्वन्ति ते सदा ।

न कुर्वन्त्यपि वै किंचिन्नैषां क्वचिदपि ग्रहः ।। ११

काकतालीयतो विष्णुरेवंकर्मोदितः पुरा ।

एवंकर्मा त्रिनयन एवंकर्माम्बुजोद्भवः ।। १२

न निन्द्यमस्ति नानिन्द्यं नोपादेयं न हेयता ।

न चात्मीयं न च परं कर्म ज्ञविषयं क्वचित् ।। १३

अग्न्यादीनां यथौष्ण्यादि सर्गादौ रूढिमागतम् ।

हरादीनां तथा कर्म द्विजातीनां च जातयः ।। १४

सर्गे प्ररूढिमायाते संकेतवशतः पृथक् ।

अनुभूतिफलाश्चर्याः कल्पिताः कल्पिताः स्वयम्।।१५

विदेहमुक्तविषयं तुर्यमौनमतो मया ।

नोक्तं तव परं मौनं सदेहस्य रघूद्वह ।। १६

खादप्यतितरामच्छमात्माकाशं चिदात्मकम् ।

तत्ताप्राप्तिः परं श्रेयः सा कथं प्राप्यते श्रृणु ।। १७

सम्यग्ज्ञानावबोधेन नित्यमेकसमाधिना ।

संख्ययैवावबुद्धा ये ते स्मृताः सांख्ययोगिनः ।। १८

प्राणाद्यनिलसंशान्तौ युक्त्या ये पदमागताः ।

अनामयमनाद्यन्तं ते स्मृता योगयोगिनः ।। १९

उपादेयं तु सर्वेषां शान्तं पदमकृत्रिमम् ।

तत्केचित्संख्यया प्राप्ताः केचिद्योगेन देहतः ।। २०

एकं सांख्यं च योगं च यः पश्यति स पश्यति ।

यत्सांख्यैः प्राप्यते स्थानं परं योगैस्तदेव हि ।। २१

यत्र प्राणमनोवृत्तिरत्यन्तं नोपलभ्यते ।

वासनावागुरोत्क्रान्ता तद्विद्धि परमं पदम् ।। २२

वासनां चित्तमेवाहुः कारणं तद्धि संसृतेः ।

तदकारणतामेति विलीयोभयकर्मसु ।। २३

मनः पश्यति वै देहं बालो वेतालकं यथा ।

स्वात्मानं विलयं नीत्वा न भूयस्तं प्रपश्यति ।। २४

मनो मुधैवाभ्युदितमसदेवानवेक्षणात् ।

स्वप्ने स्वमरणाकारं प्रेक्ष्यमाणं न विद्यते ।। २५

मनोभवस्तु संसारः क्व ममाहं क्व संततिः ।

उपदेश्योपदेशादिबन्धमोक्षौ च तत्कुतः ।। २६

एकतत्त्वघनाभ्यासः प्राणानां विलयस्तथा ।

मनोविनिग्रहश्चेति मोक्षशब्दार्थसंग्रहः ।। २७

श्रीराम उवाच ।

यदि हि प्राणविलयो मुने मोक्षस्य कारणम् ।

मृता एव विमुच्यन्ते तन्मन्ये सर्वजन्तवः ।। २८

श्रीवसिष्ठ उवाच ।

त्रिष्वेतेषु प्रयोगेषु मनःप्रशमनं वरम् ।

साध्यं विद्धि तदेवाशु यथा भवति तच्छिवम् ।। २९

यदा निर्वाणनं प्राणास्त्यजन्तीदं शरीरकम् ।

तदानुभूय तन्मात्रैर्यान्ति व्योमनि संगमम् ।। ३०

वासनासात्मकान्येव विद्धि तन्मात्रकाणि वै ।

तदात्मकैर्मनोवद्भिः प्राणैः श्लिष्यन्ति नेतरैः ।। ३१

सवासनास्तूत्पद्यन्ते प्राणा मुञ्चन्ति देहकम् ।

तद्व्योमवायुसंश्लेषं यान्ति दुःखाय गन्धवत् ।। ३२

मनः साम्बुरिवाम्भोधौ न शाम्यति सवासनम् ।

नामनस्काः संभवन्ति प्राणाः सूर्य इव त्विषः ।। ३३

न जहाति मनः प्राणान्विना ज्ञानेन कर्हिचित् ।

तृणान्तरेणैव विना तृणाङ्गमिव तित्तिरिः ।। ३४

ज्ञानादवासनीभावं स्वनाशं प्राप्नुयान्मनः ।

प्राणात्स्पदं च नादत्ते ततः शान्तिर्हि शिष्यते ।। ३५

ज्ञानात्सर्वपदार्थानामसत्त्वं समुदेत्यलम् ।

ततोऽङ्ग वासनानाशाद्वियोगः प्राणचेतसोः ।। ३६

ततो न पश्यति मनः प्रशान्तं देहतां पुनः ।

स्वनाशेन पदं प्राप्तं वासनैव मनो विदुः ।। ३७

चेतो हि वासनामात्रं तदभावे परं पदम् ।

तत्त्वं संपद्यते ज्ञानं ज्ञानमाहुर्विचारणम् ।। ३८

इत्यस्याः संसृते राम पर्यन्तः संप्रवर्तते ।

स्वयं विवेकमात्रेण रज्जुसर्पभ्रमाकृतेः ।। ३९

एकार्थाभ्यसनप्राणरोधचेतःपरिक्षयाः ।

एकस्मिन्नेव संसिद्धे संसिद्ध्यन्ति परस्परम् ।। ४०

तालवृन्तस्य संस्पन्दे शान्ते शान्तो यथानिलः ।

प्राणानिलपरिस्पन्दे शान्ते शान्तं तथा मनः ।। ४१

प्राणः शरीरविलये प्रयाति व्योमवायुताम् ।

यथा वासितमेवेदं सर्वं पश्यति तत्र वा ।। ४२

यथा विदेहाः पश्यन्ति प्राणा व्योमनि देहकम् ।

समनस्कास्तथाचारं सर्वं चानुभवन्ति ते ।। ४३

शान्ते वातपरिस्पन्दे यथा गन्धः प्रशाम्यति ।

तथा शान्ते मनःस्पन्दे शाम्यन्ति प्राणवायवः ।। ४४

अविनाभाविनी नित्यं जन्तूनां प्राणचेतसी ।

कुसुमामोदवन्मिश्रे तिलतैले इव स्थिते ।। ४५

मनसः स्पन्दनं प्राणः प्राणस्य स्पन्दनं मनः ।

एतौ विहरतो नित्यमन्योन्यं रथसारथी ।। ४६

आधाराधेयवच्चैतावेकाभावे विनश्यतः ।

कुरुतश्च स्वनाशेन कार्यं मोक्षाख्यमुत्तमम् ।। ४७

एकतत्त्वघनाभ्यासाच्छान्तं शाम्यत्यलं मनः ।

तल्लीनत्वात्स्वभावस्य तेन प्राणोऽपि शाम्यति ।। ४८

विचार्य यदनन्तात्मतत्त्वं तन्मयतां नय ।

मनस्ततस्तल्लयेन तदेव भवति स्थिरम् ।। ४९

यदेवातितरां श्रेयोऽनुपलम्भोपलम्भयोः ।

द्वयोरप्यसतोस्तत्र शेषे वापि स्थिरो भव ।। ५०

एकस्मिन्सुदृढे तत्त्वे तावद्भावं विभावयेत् ।

भावोऽभावत्वमायाति स्वभ्यासाद्यावदाततम् ।। ५१

प्रत्याहारवतां चेतः स्वयं भोग्यक्षयादिव ।

विलीयते सह प्राणैः परमेवावशिष्यते ।। ५२

यदेकतानं भवति चेतस्तद्भवति क्षणात् ।

शान्ताशेषविशेषौघं चिराभ्यासस्वभावतः ।। ५३

अविद्येयं तु नास्तीति बुद्ध्वा युक्तियुतं धिया ।

ज्ञानादेव परावाप्तिस्तदभ्यासस्ततः परम् ।। ५४

चित्ते शान्ते शाम्यतीयं संसारमृगतृष्णिका ।

जरामुपगते मेघे मिहिका तन्मयी यथा ।। ५५

चित्तमात्रमविद्येति कुरु तेनैव तत्क्षयम् ।

तद्रूपं राम चित्तात्मा नाभावो हि परं पदम् ।। ५६

मुहूर्तमेव निर्वाणं यदि चेतः परे पदे ।

तत्तत्परिणतं विद्धि तत्रैवास्वादमागतम् ।। ५७

यदि सांख्येन विश्रान्तं चेतो योगेन वापि ते ।

क्षणं तत्सत्त्वतां यातं न भूय इह जायते ।। ५८

चेतो विगलिताविद्यं सत्त्वशब्देन कथ्यते ।

दग्धसंसारबीजं तन्न ददात्यन्तरं पुनः ।। ५९

कश्चिद्विगलिताविद्यः सत्त्वस्थः शान्तवासनः ।

परं शून्योपमं सद्यो ज्योतिः पश्यति शाम्यति ।। ६०

विगलितात्मपदं विगलन्मनः

सुभग सत्त्वमितीह हि कथ्यते ।

न पुनरेति कलामलिनं पदं

कनकतामिव ताम्रमुपागतम् ।। ६१

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वा० पू० प्राणमनःसंयोगविचारणं नामैकोनसप्ततितमः सर्गः ।। ६९

।।